## न पदान्ताट्टोरनाम् । (४२/११४)

पदान्ताट् टवर्गादुत्तरस्य स्तोः ष्टुत्वं न भवति [1]नाम् इत्येतद् वर्जयित्वा । श्वलिट् साये । मधुलिट् तरति । पदान्तात् इति किम् ? 'ईड स्तुतौ' (धा. पा. १०२०)–ईट्टे । टोः इति किम् ? सर्पिष्टमम् । अनाम् इति किम् ? षण्णाम् । अत्यल्पमिदमुच्यते ।

[९५४] अनाम्नवतिनगरीणामिति वक्तव्यम् । (म. भा. ३. ४६३)

षण्णाम् । षण्णवतिः । षण्णगरी ॥

## तोः षि । (४३/११७)

न इति वर्तते । तवर्गस्य षकारे[2] यदुक्तं तन्न भवति । [3]अग्निचित्षण्डे[4] । [5]भवान्षण्डे । महान्षण्डे[6] ॥

## शात् । (४४/११२)

तोः इति वर्तते[7] । शकारादुत्तरस्य तवर्गस्य यदुक्तं तन्न भवति । प्रश्नः । विश्नः ॥

## यरोऽनुनासिकेऽनुनासिको वा । (४५/११६)

[8]पदान्तग्रहण[9]मनुवर्तते । यरः पदान्तस्य अनुनासिके परतः वा अनुनासिकः आदेशो भवति । [10]वाङ नयति, वाग्नयति । श्वलिण्नयति, श्वलिड्नयति । अग्निचिन्नयति, अग्निचिद् नयति । त्रिष्टुम्नयति, त्रिष्टुब् नयति । पदान्तस्य इत्येव, वेद्मि । [11]क्षुभ्नाति ।

[९५५] यरो[12]ऽनुनासिके प्रत्यये भाषायां नित्यवचनं [13]कर्तव्यम् । (म. भा. ३. ४६४)

[14]वाङमयम् । [15]त्वङमयम् । व्यवस्थितविभाषाविज्ञानात् सिद्धम् ॥

## अचो रहाभ्याम् द्वे । (४६/८९)

यरः इति [16]वर्तते । अच उत्तरौ यौ रेफहकारौ ताभ्यामुत्तरस्य यरो द्वे भवतः । अर्क्कः । मर्क्कः । ब्रह्म्मा । अपह्न्नुते । अचः इति किम् ? किन् ह्नुते । किम् ह्मलयति ॥

---

1. नाम्वर्जितस्य क. 2. परतः इत्यधिकम् क. 3. पदान्ते इत्यधिकम् इ. 4. सोमसुत्षण्डे इत्यधिकम् क. इ. ह. 5. उदाहरणमिदं नास्ति क. 6. सन्षण्ढः इत्यधिकम् इ. 7. नेति च इत्यधिकम् क. ह. 8. वाक्यमिदं नास्ति ब. 9. इह इत्यधिकम् ह. 10. वाङ्नयनम् वाग्नयनम् ब. ड. 11. स्तभ्नाति इ. ह. 12. अनुनासिकत्वे मयट्प्रत्यये क, अनुनासिकत्वे तद्धितप्रत्यये इ.ह. 13. च इत्यधिकम् क. 14. वाङ्मात्रम् ब, अम्मयं इत्यधिकम् ब, चिन्मयम् क. इ. ह. 15. कियन्मात्रम् ड. 16. अनवर्तते क.